
डॉ० रविशंकर पाण्डेय

ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा प्रस्तावितः

# त्रैमासिकः संस्कृतसम्भाषणप्रशिक्षणपाठ्यक्रमः

## (सर्टिफिकेट कोर्स)

### संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी



*** समन्वयकः ***

**डॉ. रविशंकर पाण्डेयः**

सह - समन्वयकः

1. डॉ. राजा पाठकः
2. डॉ. मधुसूदन मिश्रः

Scanned with OKEN Scanner

# उद्देश्यम्

संस्कृतभाषा संवादभाषा भवेत्, अधिसंख्यजनाः संस्कृतसम्भाषणे दक्षाः भवेयुः तदर्थम् आधुनिक-यन्त्रमाध्यमेन सुगमविधिना उत्तरप्रदेशशासन-निर्देशानुगुणं संस्कृतभाषा-दक्षप्रशिक्षकैः संपूर्णानन्दसंस्कृतविश्वविद्यालयेन च त्रैमासिकं संस्कृतभाषाप्रमाण-पत्रीयं (सर्टिफिकेट कोर्स) -पाठ्यक्रमप्रशिक्षणं सङ्कल्पितम् अस्ति। संकल्प- संपूर्त्तये पञ्चचत्वा-रिंशत् होरात्मकाः विषयविन्दवः चिताः सन्ति।

तथा च -

नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी,
सदने सदने जन-जन-वदने जयतु चिरं कल्याणी।
सत्यशीलसौन्दर्यसमीरा ज्ञानजला गतिसारा,
छलछलकलकल प्रवहतु दिशि दिशि पावनसंस्कृतधारा ।।

Scanned with OKEN Scanner

# पाठ्यक्रमसंरचना

सर्टिफिकेट-संस्कृतसम्भाषण-पाठ्यक्रमः त्रैमासिकः सञ्चालितो भविष्यति। अस्मिन् त्रैमासिके पाठ्यक्रमे पञ्चचत्वारिंशत् होरात्मकाः पाठ्यविन्दवः संरचिताः सन्ति। अस्य पाठ्यक्रमस्य चत्वारि प्रश्नपत्राणि, प्रतिप्रश्नपत्रं शतं (100) पूर्णाङ्काः, उत्तीर्णाङ्काः षड्त्रिंशत् (36) निर्धारिताः विद्यन्ते।

Scanned with OKEN Scanner

Three Months

# प्रथमं प्रश्नपत्रम्

सर्टिफिकेट-संस्कृतसम्भाषणपाठ्यक्रमस्य त्रैमासिकस्य प्रथमे प्रश्नपत्रे शब्दपरिचयः, क्रियापदपरिचयः, वाक्यनिर्माणञ्च त्रयः प्रमुखाः पाठ्यविन्दवः वर्तन्ते । प्रशिक्षकाः अध्यापने मुख्यरूपेण परिवेशीयान् संज्ञाशब्दान्, क्रियाशब्दाञ्च पाठयिष्यन्ति, परिवेशीयशब्दैः छात्राः सुपरिचिताः प्रकृत्या भवन्ति । अस्य प्रश्नपत्रस्य पाठनकालः दशहोरात्मकः ।

| प्रथमं प्रश्नपत्रम् | पूर्णाङ्काः 100 | होरात्रयम् |
|---|---|---|

**विषयः-** | **पाठनकालांशः**

**1. शब्दपरिचयः (परिवेशीयाः शब्दाः) –** | **चतुर्होरात्मकः**

| | | |
|---|---|---|
| (क) | सुबन्ततिङन्तपदपरिचयः यथा (गजः, अश्वः , बालकः , मोहनः , वदति , खादति , लिखति) । | (एकहोरात्मकः) |
| (ख) | सम्बन्धबोधकाः शब्दाः यथा (माता-पिता, भ्राता-भगिनी, पति-पत्नी) । | (एकहोरात्मकः) |
| (ग) | दिनचर्या-शब्दाः यथा (प्रातः जागरणम् , रात्रौ शयनम् , दन्तधावनम् , मुखप्रक्षालनम्) । | (एकहोरात्मकः) |
| (घ) | गृहवस्तु यथा (मार्जनी, तुला, मञ्जूषा, घटीयन्त्रम् , छत्रम्) । | (एकहोरात्मकः) |

**2. क्रियापदपरिचयः (परिवेशीयाः क्रियाशब्दाः) –** | **होरात्रयः**

लट्-लृट्-लङ्लकारेषु क्रियापदानां परिचयः प्रचलिताः दशधातवः (भू-पठ्-गम्-स्था, पा, लिख्, शीङ्,दृश्य, याच् - वद्) (प्रतिलकारम् एकहोरात्मकम्)

यथा- (भवति , भविष्यति , अभवत्)।

**3.वाक्यनिर्माणम्** | **होरात्रयम्**

| | |
|---|---|
| सुबन्तेन | (एकहोरात्मकम्) |
| तिङन्तेन | (एकहोरात्मकम्) |
| प्रश्नवाचकेन | (एकहोरात्मकम्) |

(क) सुबन्ततिङन्तपदं संयोज्य संवादात्मकं वाक्यम् । यथा –(मम नाम मोहनः, तव नाम किम् ? मोहनः पठसि, त्वं किं करोषि ?) ।

संदर्भग्रन्थाः - (धातुरूपावली,शब्दरूपावली,संस्कृतवाक्यसंग्रह-सार्वभौमसंस्कृतप्रचारसंस्थानस्य)।

Scanned with OKEN Scanner

# द्वितीयं प्रश्नपत्रम्

अस्य पाठ्यक्रमस्य द्वितीये प्रश्नपत्रे विभक्तिप्रयोगपरिचयः लकार-प्रयोगपरिचयः- अव्यय-सर्वनाम-शब्दपरिचय इति त्रयः पाठ्यविन्दवः अध्यापनीयाः सन्ति, वाक्ये सुबन्त-तिङन्त-अव्यय-सर्वनाम-शब्दाः मुख्यरूपेण समुपलभ्यन्ते। तेषां परिज्ञानं संस्कृतभाषासंभाषणे महत्त्वपूर्णं भवति। अस्य प्रश्नपत्रस्य पाठनकालः दशहोरात्मकः।

द्वितीयं प्रश्नपत्रम्- पूर्णाङ्काः(100) होरात्रयम्

**विषयः-** **पाठनकालांशः**

1. विभक्तिप्रयोगपरिचयः- (त्रिहोरात्मकः)

प्रथमा-पञ्चमी (एकहोरात्मकः)

षष्ठी-सप्तमी (एकहोरात्मकः)

(क) सप्तविभक्तयः - सप्तविभक्तिं योजयित्वा-----राम-हरि-गुरु-नदी शब्दरूपं प्रशिक्षणीयम्।

2. लकारप्रयोगपरिचयः- (होरात्रयः)

(क) लट्-लिट्-लङ्लकारेषु क्रियापदानां प्रयोगपरिचयः- (प्रतिलकारम् एकहोरात्मकम्)

यथा ----------------------------------(मोहनः गच्छति , मोहनः गमिष्यति , मोहनः अगच्छत्)।

3. अव्यय-सर्वनाम-शब्दपरिचयः- (पञ्चहोरात्मकः)

(क) स्थान-काल-प्रकारवाचकाः अव्ययशब्दाः--- यथा (कुत्र , तत्र , अत्र, ह्यः) (प्रतिविषयं एकहोरात्मकम्)

(ख) तत्, अस्मद् युस्मद्, एतत्, किम्, भवत् प्रभृतयः सर्वनामशब्दाः । (द्विहोरात्मकाः)

**विशेषः** - सुबन्त-तिङन्तपदैः अव्ययशब्दैश्च लघुवाक्यनिर्माणं विधाय संस्कृतसम्भाषणं प्रशिक्षणीयम्।

सन्दर्भग्रन्थः - रचनानुवादकौमुदी- (कपिलदेव द्विवेदिनः)।

Scanned with OKEN Scanner

# तृतीयं प्रश्नपत्रम्

अस्मिन् तृतीये प्रश्नपत्रे प्रत्ययप्रयोगपरिचयः, शतृ-क्तवतुप्रत्ययान्त-शब्दरूपपरिचयः, वाच्यपरिवर्तनं संख्यावाचक शब्दव्यवहारः त्रयः पाठ्यविन्दवः निर्धारिताः सन्ति | वाक्यनिर्माणे संभाषणे वा कृत्प्रत्ययानां प्रयोगः सुगमः भवति तिङन्तपदस्य प्रयोगापेक्षया | वाक्ये संभाषणविस्ताराय वाच्य परिवर्तनमपि प्रशिक्षणीयमस्ति |

**विशेष** :- (1) सुगमाः संज्ञा शब्दाः, क्रियाशब्दाः संख्यावाचकाः उपपद विभक्तिशब्दाः (सह, बिना, अभितः, परितः, नमः) क्रीडायां प्रयुक्तशब्दाः, प्रशिक्षकः, पाठनकाले व्यवहरणीयाः । व्याकरणस्य नियमाः अपेक्षिताशेत् तदेव पाठनीयाः । व्यवहार पक्षः प्रमुखः- पाठने नियमपक्षः गौणः एतेन संप्रेषणविधिः सुगमः बोधगम्यश्च भवति ।

| तृतीयं प्रश्नपत्रम्- | पूर्णाङ्काः(100) | होरात्रयम् |
|---|---|---|

| | |
|---|---|
| विषयः- | पाठनकालांशः(दशहोरात्मकः) |
| **1. प्रत्ययप्रयोगविधिः-** | **(चतुर्होरात्मकः)** |
| (क) तव्यत्, अनीयर्, क्त्वा, ल्यप्, ल्युट्, क्त, क्तवतु, तुमुन् शतृ-प्रत्ययान्तशब्दपरिचयः \| यथा (पठनीयम् , पठित्वा , पठितवान् , पठितुम्)\| | **(द्विहोरात्मकः)** |
| (ख) एषां प्रत्ययान्तशब्दानां वाक्याभ्यासः | **(द्विहोरात्मकः)** |
| **2. क्त-शतृ-क्तवतुप्रत्ययान्त-शब्दरूपपरिचयः -** | **(त्रिहोरात्मकः)** |
| (क) पुरुषवचनानुगुणम् | (प्रति प्रत्ययम् एकहोरात्मकम्) |
| **3. वाच्यपरिवर्तनम् –** | **(त्रिहोरात्मकम्)** |
| (क) कर्तृ-कर्म-भाव वाच्यवाच्यं \| (वाच्य परिवर्तने कृत्प्रत्ययाः अपि व्यवहरणीयाः) यथा -(सः पठति , ग्रन्थः पठितव्यः , मया पठनीयं, तेन भूयते)\| | (प्रतिवाच्य एकहोरात्मकम्) |
| (ख) संख्यावाचक शब्द व्यवहारः | |

संदर्भग्रन्थाः- शब्दरूपावली,लधुसिद्धान्तकौमुद्याः कृदन्तप्रकरणम्, रचनानुवादकौमुदी|

Scanned with OKEN Scanner

# चतुर्थं प्रश्नपत्रम्

अस्य पाठ्यक्रमस्य चतुर्थे प्रश्नपत्रे अबाधगत्या संस्कृतसंभाषणार्थं सूक्ति-श्लोक-कथा-नीति पद्यानां समावेशः कृतो विद्यते | सम्भाषणे प्रशिक्षकाः प्रचलित- सूक्तीनां सरलश्लोकानाञ्च अर्थबोधम् उच्चारणविधिञ्च शिक्षयिष्यन्ति | गीतायाः,मूलरामायणस्य श्लोकाः, पञ्चतंत्रस्य कथा, चाणक्यस्य नीतिपद्यानि पाठनीयाः प्रदत्तानि उदाहरणानि अन्यान्यपि पाठितव्यानि | अस्य प्रश्नपत्रस्य पाठनकालः पञ्चदशहोरात्मकः ।

चतुर्थं प्रश्नपत्रम्- पूर्णाङ्काः(100) (होरात्रयम्)

विषयः- पाठनकालांशः

(क)सूक्तिः- (होरात्रयी)

यथा (सत्यमेव जयते , एकोऽहं वहुस्याम् , वसुधैव कुटुम्बकम्)|

(ख)श्लोकः- (होरात्रयः)

यथा- त्वमेव माता च पिता त्वमेव , त्वमेव बन्धुश्चसखा त्वमेव |

त्वमेव विद्या द्रविणं त्वमेव , त्वमेव सर्वं मम देव देव ||

(ग) कथा- (पञ्चहोरात्मिका)

(घ) नीतिपद्यम्- (चतुर्होरात्मकम्)

**संदर्भग्रन्थाः-** यथा- चाणक्यनीतिः, विदुरनीतिः, पञ्चतन्त्रम् अन्ये ग्रन्थाः अपेक्षिताश्चेत् संग्रहणीयाः |

Scanned with OKEN Scanner